॥ अथोमामहेश्वरस्तुतिः ॥

प्रदीप्तरत्नोज्ज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमश्शिवायै च नमश्शिवाय ॥

नमश्शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥ १

नमश्शिवाभ्यां सरसोत्सवाभ्यां नमस्कृताभीष्टवरप्रदाभ्याम् ।
नारायणेनार्चितपादुकाभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥ २

नमश्शिवाभ्यां वृषवाहनाभ्यां विरिञ्चिविष्ण्वन्द्रसुपूजिताभ्याम् ।
विभूतिपाटीरविलेपनाभ्यां नमो नमश्शङ्करपार्वतीभ्याम् । ३

नमश्शिवाभ्यां जगदीश्वराभ्यां जगत्पतिभ्यां जयविग्रहाभ्याम् ।
जम्भारिमुख्यैरभिवन्दिताभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥ ४

नमश्शिवाभ्यां परमौषधाभ्यां पञ्चाक्षरीपञ्जररञ्जिताभ्याम्।
प्रपञ्चसृष्टिस्थितिसंहृताभ्यां नमो नमश्शङ्कर पार्वतीभ्याम् ॥५

नमश्शिवाभ्यामतिसुन्दराभ्यामत्यन्तमासक्तहृदम्बुजाभ्याम्।
अशेषलोकैकहितङ्कराभ्यां नमो नमश्शङ्कर पार्वतीभ्याम् ॥६

नमश्शिवाभ्यां कलिनाशनाभ्यां कङ्कालकल्याणवपुर्धराभ्याम्।
कैलासशैलस्थितदेवताभ्यां नमो नमश्शङ्कर पार्वतीभ्याम् ॥७॥

नमश्शिवाभ्यामशुभापहाभ्यामशेषलोकैकविशेषिताभ्याम्।
अकुण्ठिताभ्यां स्मृतिसम्भृताभ्यां नमो नमश्शङ्कर पार्वतीभ्याम् ॥८॥

नमश्शिवाभ्यां रथवाहनाभ्यां रवीन्दुवैश्वानरलोचनाभ्याम्।
राकाशशाङ्काभमुखाम्बुजाभ्यां नमो नमश्शङ्कर पार्वतीभ्याम् ॥९॥

नमश्शिवाभ्यां जटिलंधराभ्यां जरामृतिभ्यां च विवर्जिताभ्याम्।

जनार्दनाब्जोद्भवपूजिताभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥१०

नमश्शिवाभ्यां विषमेक्षणाभ्यां बिल्वाक्षमामल्लिकदामभृद्भ्याम् ।
शोभावतीशान्तवतीश्वराभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥११॥

नमश्शिवाभ्यां पशुपालकाभ्यां जगत्त्रयीरक्षणबद्धहृद्भ्याम् ।
समस्तदेवासुरपूजिताभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥१२॥

स्तोत्रं त्रिसन्ध्यं शिवपार्वतीभ्यां भक्त्या पठन्द्वादशकं नरो यः ।
स सर्वसौभाग्यफलानि भुङ्क्ते शतायुरन्ते शिवलोकमेति ॥

इतिश्रीमच्छङ्करभगवत्पादविरचितं शङ्करपार्वतीस्तोत्रं सम्पूर्णम् ॥

कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम् ।
सदा रमन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि ॥

अथ भागवतदशमस्कन्धस्थं गोपीगीतम् ॥

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥
शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥
विषजलाप्ययाद्व्यालराक्षसाद् वर्षमारुताद् वैद्युतानलात् ।
वृषमयात्मजाद् विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ॥
न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥
विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥

व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित।
भज सखे भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय॥

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम्।
फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम्॥

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण।
विधिकरीरिमा वीर मुह्यतीरधरसीधुनाप्याययस्व नः॥

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः॥

प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमङ्गलम्।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि॥

चलसि यद्व्रजाच्चारयन् पशून्नलिनसुन्दरं नाथ ते पदम्।
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति॥

दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ।
घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥
प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥
सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥
अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्ष्यते पक्ष्मकृद्दृशाम् ॥
पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥
रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरःश्रियो वीक्ष्य धाम ते मुहुरतिस्पृहं मुह्यते मनः ॥

व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम्।
त्यज मनाक्च न त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम्॥

यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु।
तेनाटवीमटसि तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः॥

॥ इति गोपीगीतं भागवतोक्तम्॥

॥ कविलीलाशुकविरचितः श्रीकृष्णरासक्रीडाप्रबन्धः ॥

अङ्गनामङ्गनामन्तरे माधवो माधवं माधवं चान्तरेणाङ्गना ।
इत्थमाकल्पिते मण्डले मध्यगः सञ्जगौ वेणुना देवकीनन्दनः ।

केकिकेकादृतानेकपङ्केरुहालीनहंसावलीहृद्यताहृद्यता ।
कंसवंशाटवीदाहदावानलः सञ्जगौ वेणुना देवकीनन्दनः ॥

क्वापि वीणाभिराराविणा कम्पितः क्वापि वीणाभिराकिङ्किणीनर्तितः ।
क्वापि वीणाभिरामान्तरं गापितः सञ्जगौ वेणुना देवकीनन्दनः ॥

चारुचन्द्रावलीलोचनैश्चुम्बितो गोपगोवृन्दगोपालिकावल्लभः ।
वल्लवीवृन्दवृन्दारकः कामुकः सञ्जगौ वेणुना देवकीनन्दनः ॥

मौलिमालामिलन्मत्तभृङ्गीलताभीतभीतप्रियाविभ्रमालिङ्गितः ।
स्रस्तगोपीकुचाभोगसम्मेलितं सञ्जगौ वेणुना देवकीनन्दनः ॥

चारुचामीकराभासभामाविभुर्वैजयन्तीलतावासितोरस्स्थलः ।
नन्दवृन्दावने वासितामध्यगः सञ्जगौ वेणुना देवकीनन्दनः ॥

बालिकातालिकाताललीलालयासङ्गसन्दर्शितभ्रूलताविभ्रमः ।
गोपिकागीतदत्तावधानस्स्वयं सञ्जगौ वेणुना देवकीनन्दनः ॥

पारिजातं समुद्धृत्य राधावरो रोपयामास भामागृहस्याङ्गणे ।
शीतशीते वटे यामुनीये तटे सञ्जगौ वेणुना देवकीनन्दनः ॥

कस्तूरीतिलकं ललाटफलके वक्षस्स्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचन्दनं च कलयन् कण्ठे च मुक्तावलिं
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥
सायङ्काले वनान्ते कुसुमितसमये सैकते चन्द्रिकायां
त्रैलोक्याकर्षणाङ्गं सुरवरगणिकामोहनापाङ्गमूर्तिम् ।
सेव्यं शृङ्गारभावैर्नवरसभरितैर्गोपकन्यासहस्रैः
वन्देऽहं रासकेलीरतमतिसुभगं वश्यगोपालकृष्णम् ॥

॥ अथ श्री गुरु दत्तात्रेय नामामृतम् ॥

दत्तात्रेय तव शरणम् । दत्तनाथ तव शरणम् ।
त्रिगुणात्मक त्रिगुणातीत त्रिभुवनपालक तव शरणम् ॥ध्रु०॥
शाश्वतमूर्ते तव शरणम् । श्यामसुन्दर तव शरणम् ।
शेषाभरण शेषभूषण शेषशायिन् तव शरणम् ॥ १ ॥
षड्भुजमूर्ते तव शरणम् । षड्भुज यतिवर तव शरणम् ।
दण्डकमण्डलुगदापद्म शङ्खचक्रधर तव शरणम् ॥ २ ॥
करुणानिधे तव शरणम् । करुणासागर तव शरणम् ।
कृष्णासङ्गमतरुवर वास भक्तवत्सल तव शरणम् ॥ ३ ॥
श्रीगुरुनाथ तव शरणम् । सद्गुरुनाथ तव शरणम् ।
श्रीपादश्रीवल्लभ गुरुवर नरसिंह सरस्वति तव शरणम् ॥ ४ ॥

कृपामूर्ते तव शरणम् । कृपासागर तव शरणम् ।
कृपाकटाक्ष कृपावलोकन कृपानिधे तव शरणम् ॥५॥
कालान्तक तव शरणम् । कालनाशन तव शरणम् ।
पूर्णानन्द पूर्णपरेश पुराणपुरुष तव शरणम् ॥६॥
जगदीश्वर तव शरणम् । जगतोनाथ तव शरणम् ।
जगत्पालक जगत्कारण जगदुद्धार तव शरणम् ॥७॥
अखिलान्तक तव शरणम् । अखिलैश्वर्य तव शरणम् ।
भक्तजनप्रिय भवभयनाशन प्रसन्नवदन तव शरणम् ॥८॥
दिगम्बर तव शरणम् । दीनदयाघन तव शरणम् ।
दीननाथ दीनदयालो दीनोद्धारक तव शरणम् ॥९॥
तपोमूर्ते तव शरणम् । तेजोराशे तव शरणम् ।

ब्रह्मानन्द ब्रह्मसनातन ब्रह्मचित्सुख तव शरणम् ॥ १०॥
विश्वात्मक तव शरणम् । विश्वरक्षक तव शरणम् ।
विश्वम्भर विश्वजीवन विश्वपरात्पर तव शरणम् ॥ ११॥
विघ्नान्तक तव शरणम् । विघ्ननाशन तव शरणम् ।
प्रणवातीत प्रेमसागर प्रकाशमूर्ते तव शरणम् ॥ १२॥
निजानन्द तव शरणम् । निजपददायक तव शरणम् ।
नित्यनिरञ्जन निराकार निराधार तव शरणम् ॥ १३॥
चिद्घनमूर्ते तव शरणम् । चिदाकार तव शरणम् ।
चिदात्मरूप चिदानन्द चित्सुखकन्द तव शरणम् ॥ १४॥
अनादिमूर्ते तव शरणम् । अखिलवतार तव शरणम् ।
अनन्तकोटिब्रह्माण्डनायक अघटितघटन तव शरणम् ॥ १५॥
भक्तोद्धार तव शरणम् । भक्तरक्षक तव शरणम् ।
भक्तानुग्रह भक्तजनप्रिय पतितोद्धार तव शरणम् ॥ १६॥

अथसद्गुरुश्रीमच्छङ्करभगवत्पादनामामृतम् ।

षण्मतस्थापनाचार्यमद्वैतानन्दरूपिणम् ।
जगद्गुरुमहं वन्दे श्रीमच्छङ्करदेशिकम् ॥
श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

जय जय शङ्कर लोकगुरो। भयहर शङ्कर भुवनगुरो ॥
श्रीमच्छङ्कररूप गुरो। कामितवितरण लोकगुरो ॥ ध्रुव० ॥
विबुधप्रार्थित लोकगुरो । अबुधमतान्धसुदीप गुरो ॥ १ ॥
कलिबाधितसन्त्रात गुरो । कालट्युद्भव लोकगुरो ॥ २ ॥
द्विजवरशिवगुरुपुत्र गुरो । निजधर्माम्बामोदित गुरो ॥ ३ ॥
शैशवचित्रचरित्र गुरो । ईशगमगगणेश गुरो ॥ ४ ॥
व्याजाञ्चितनरभाव गुरो । नैजप्रतिभोल्लसित गुरो ॥ ५

अधीतवेदविनोदगुरो । सुधांशुसुन्दरवदनगुरो ॥६॥
सकलश्रुतिमतदक्ष गुरो । शुकमुखसम्मतभाव गुरो ॥७॥
निखिलागमकमलार्क गुरो । सुखबोधितसकलार्थ गुरो ॥८॥
मातृभक्तिपरिपूर्ण गुरो । श्रोतृजनाद्भुतचरित गुरो ॥९॥
श्रुतिसम्मतयातिवेष गुरो । सततविचिन्तितब्रह्म गुरो ॥१०॥
गोविन्दात्तसुबोध गुरो । आनन्दाब्धिमृगाङ्क गुरो ॥११॥
दुर्मतपर्वतकुलिश गुरो । निर्मलबोधानन्द गुरो ॥१२॥
विरचितभाष्यबुधेड्य गुरो । निरुपमप्रतिभोल्लास गुरो ॥१३॥
काशीयात्रासक्त गुरो । ईशभक्तिपरिपूर्ण गुरो ॥१४॥
सुनन्दिताखिलशिष्य गुरो । सनन्दनाद्यभिवन्द्य गुरो ॥१५॥
पाशुपतद्रुमपरशुगुरो । मूलोत्पाटितसौगत गुरो ॥१६॥
भेदमतेभमृगेन्द्र गुरो । धीशोभितमौनीश गुरो ॥१७॥

व्यासादृतश्रुतिभाष्यगुरो । मोदितश्रुतिगण लोकगुरो ॥१८

मण्डनवादासक्त गुरो । खण्डिततन्मतनिचय गुरो ॥१९॥

साधितजीवेशैक्य गुरो । बोधोज्ज्वल बुधमान्य गुरो ॥२०॥

मण्डनपण्डितवन्द्य गुरो । भासोज्ज्वलवरदेह गुरो ॥२१॥

वाणीवादासक्त गुरो । शोणाम्बर शमभूष गुरो ॥२२॥

चार्वाकोरगगरुड गुरो । सूर्यायुतसमतेज गुरो ॥२३॥

स्थापितषण्मतसार गुरो । तापापह मुनिवन्द्य गुरो ॥२४

उप्तादृयसद्बीज गुरो । जप्तषडक्षरमन्त्र गुरो ॥२५

करुणासागरपरम गुरो । निरुपममहिमानिलय गुरो ॥२६

जितवाग्देवीपाद गुरो । कृतशृङ्गेरीवास गुरो ॥२७।

हृत्तापापह धीर गुरो । चित्तस्थैर्यद भुवनगुरो ॥२८

अरिषड्वर्गात्त्राहि गुरो । वरपदसेवां देहि गुरो ॥३०॥
शिवपूर्वकनृहरीड्य गुरो । शिवशङ्करसद्रूप गुरो ॥३१॥
कलिपरिहारक परमगुरो । सुललितवरपदकमलगुरो ॥३२
शुद्धाद्वयशुभसुखद गुरो । सद्ध्यानसदानन्द गुरो ॥३३
भक्तजनावनदक्ष गुरो । सप्तद्वीपख्यात गुरो ॥ ३४॥
तापत्रयहरणैक गुरो । स्थापितश्रीमठसकलगुरो ॥
सकलज्ञानदसर्वगुरो । अकलङ्कमनस्सेव्य गुरो ॥३६
सकलयतीन्द्रवरार्च्य गुरो । सकलाभीष्टदकल्पगुरो ॥३७
सङ्गरहितसद्रूप गुरो । मङ्गलरूप सुरूपगुरो ॥३८
जयजय मङ्गल लोकगुरो । शुभमङ्गलजय भुवनगुरो ॥३९